त्रयोदशः पाठः

# किशोराणां मनोविज्ञानम्

[विद्यालयस्य उच्चकक्षासु अधीयानाश्छात्राः सर्वेऽपि किशोराः। अध्ययनकालेऽपि तेषां महत्त्वाकांक्षा भाविजीवनस्य समृद्धये सर्वदा वर्तमाना भवति। परस्परस्य स्पर्धापि तेषु विकसति। शरीरेषु च परिवर्तनं मानसमान्दोलयति। तत्सर्वं विचार्य शिक्षापरोऽयं पाठः निर्मितः सामयिकः प्रासङ्गि.कश्च]

© BSTBPC

जीवने परिवर्तनं प्रकृतेर्नियमः। न सदा एकरूपता तिष्ठति। अतएव कृष्णः गीतायां 'कौमारं यौवनं जरा' इति रूपेण जीवनेऽवस्थात्रयं निर्दिशति। तत्र कौमारमेव किशोरावस्था कथ्यते। बालावस्थायुवावस्थयोरन्तराले च सा भवति। उच्चविद्यालयेऽधीयानाः किशोराः किशोर्यश्च भवन्ति। विद्यालये सामान्यशिक्षाक्रमेण ते परम्परागतं पाठमेवानुसरन्ति। किंतु तेषां शारीरिको मनोवैज्ञानिकश्च पक्षावुपेक्षितौ स्तः। न शिक्षका न चाभिभावका विषयेऽस्मिन् दत्तावधानाः।

किशोराणां किशोरीणां च शरीरं मनश्च युवावस्थां प्रति प्रवर्तेते। शरीरे तावन्मार्दवं बाललक्षणं शनैः शनैः परुषतां प्राप्नोति, यौवनलक्षणानि च समाविशन्ति। शरीरेण सह मनसोऽपि वृत्ति-विकारः आगच्छति। अनुशासनं तदानीमप्रियं भवति, स्वैरवृत्तिः स्वच्छन्दता वा पदं धारयति मानसे। विशेषरूपेण एकलपरिवारे स्थितानां किशोराणां तु सैव कथा, संयुक्तपरिवारे तु सहिष्णुता बन्धुभावो वा न विनश्यति। सम्पन्नपरिवारे पालिताः किशोराः यदा कदा स्वमित्राणि विकृतानि कुर्वते। तेषां महत्त्वाकाङ्क्षां वर्धयन्ति। एते च स्वपरिवारं प्रति आक्रोशभावमपि प्रकटयन्ति। किशोरेषु विकसितस्य तादृशस्य दिवास्वप्नस्य परिशोधनं परिमार्जनं चावश्यकं भवति। तदर्थं शिक्षकाभिभावकयोर्मध्ये काले काले संवादः विचारविमर्शश्चानिवार्यः।

जीवनं प्रति आशावदभिः किशौरैर्भवितव्यम्। किन्तु स्वकीयं मूलं साधनजातं च न विस्मरणीयम्। समाजे सुलभानां साधनानामुपयोगेन स्वाभिलाषस्य पूरणं श्रेयः। लक्ष्यं च दूरतो दृश्यमानमपि सदानुबन्ध-शालिभिर्लभ्यते। एतदर्थं महतां जनानां जीवनचरितस्यापि यदा कदानुशीलनम् अनुसरणं च कर्तव्यम्।

नारीणां जागरणकालेऽधुना किशोर्योऽपि स्वाभिलाषस्य सोद्देश्यतां पूरयितुं क्षमाः सन्ति। नैकमपि कार्यं सम्प्रति ताभिरलभ्यं दृश्यते। तथापि संकल्पस्य दृढता, साधनानां स्वाभीष्टदिशया च प्रवर्तनमपि काम्यं स्यात्। साधनाभावे कुण्ठापालनं नोचितम्। अन्यथा प्रतिभाया विनाशः, सुलभस्यापि साधनस्यानुपयोग इति। अत्र नीतिकारस्य पद्यांशस्याभिनवः अर्थः अनुसरणीयः–

**दैवं निहत्य कुरु पौरुषमात्मशक्त्या**

**यत्ने कृते यदि न सिध्यति कोऽत्र दोषः ।**

अर्थात् प्रयत्नस्य फलं यदि सत्वरं न लभ्यते तदा चिन्तनीयमेतद् यन्मम प्रयत्ने कः कुत्र च दोषः आसीत्। सिद्धिः कथं न जाता इति। पुनः प्रयासोऽवधेयः। 'प्रारब्धमुत्तमजना न परित्यजन्ति' इति कवेर्वचनम् ।

शिक्षाकाले तु वर्तमानकार्यमेव चिन्तयेत् । नातिदूरं पश्येत् अन्यथा वर्तमानमपि गतं स्यात् श्रेष्ठः कालो वर्तमानः इति सुधियः कथयन्ति। संकल्पस्य दृढता, दृष्टेः व्यापकता चेति किशोरजीवनस्य मन्त्रद्वयं सदा स्मरणीयम्।

## शब्दार्थाः

| | | |
|---|---|---|
| **जरा** | वृद्धावस्था | बुढ़ापा |
| **अन्तराले** | मध्ये | बीच में |
| **अधीयानाः** | अध्मयनशीलाः | अध्ययनरत |
| **दत्तावधानाः** | सावधानाः | सतर्क/चौकस/एकाग्र/सावधान |
| **मार्दवम्** | मृदुता | कोमलता |
| **परुषताम्** | कठोरताम् | कठोरता को/कर्कशता को |
| **वृत्तिविकारः** | अवस्थापरिवर्तनम् | स्थिति में परिवर्तन |
| **स्वैरवृत्तिः** | स्वच्छन्दवृत्तिः | मनमाना व्यवहार |
| **मानसे** | मनसि, चित्ते | मन में |
| **विकृतानि** | दूषितानि | दूषित |

| | | |
|---|---|---|
| **दिवास्वप्नस्य** | आकाशकुसुमस्य | असम्भव/अवास्तविक का |
| **स्वाभिलाषस्य** | स्वेच्छायाः | अपनी इच्छा का |
| **अनुबन्धशाली** | दृढनिश्चयः | दृढ़ निश्चयवाला |
| **स्वाभीष्टदिशा** | इष्टमार्गेण | मनोनुकूल दिशा से |
| **काम्यम्** | अपेक्षितम | अपेक्षित |
| **कुण्ठा** | जडता | प्रयास के बावजूद किसी इच्छित कार्य की सिद्धि न होने के कारण आत्मग्लानि |
| **दैवम्** | भाग्यम् | भाग्य |
| **निहत्य** | त्यक्त्वा | छोड़कर |
| **पौरुषम्** | उद्यमम् | पुरुषार्थ, परिश्रम |
| **अवधेयः** | करणीयः | करना चाहिए |
| **प्रारब्धम्** | गृहीतं कार्यम् | आरम्भ किया हुआ |
| **सुधियः** | पण्डिताः/विद्वांसः | विद्वान/ ज्ञानी |
| **संकल्पम्** | निश्चयम् | निश्चय को |

## व्याकरणम्

**परिवर्तनम्** - परि + ⌧वृत् + ल्युट्। **कौमारम्** - कुमार + अण् (भावे तद्धित)। **यौवनम्** - युवन् + अण्। **किशोरावस्था** - किशोराणाम् अवस्था (षष्ठी तत्पुरुष स०, दीर्घस्वर संधि)। **वालावस्थायुवावस्थयोरन्तराले** - बालावस्था च युवावस्था च (द्वन्द्वस०) तयोः अन्तराले (षष्ठी तत्पुरुष समास, विसर्ग संधिश्च)। **पक्षावुपेक्षितौ** - पक्षौ + उपेक्षितौ (अयादि स्वर संधि)। **उच्च-विद्यालयेऽधीयानाः** - उच्चश्चासौ विद्यालयः (कर्मधारय समास) उच्चविद्यालये अधीयानाः (पूर्वरूप संधिः)। **दत्तावधानाः** - ⌧दा + क्त - दत्त । अव + ⌧धा + ल्युट् - अवधानम् । दत्तम् अवधानं यैस्ते-दत्तावधानाः (बहुब्रीहि)। **स्वाभीष्टदिशया** - स्वस्य अभीष्टमृ (षष्ठी तत्पुरुष समास) स्वाभीष्टा चासौ दिशा (कर्मधारय समास)। **प्रारब्धम्** - प्र + आ + ⌧रभ् + क्त। **उत्तमजनाः** - उत्तमश्चासौ जनः (कर्मधारय समास) ते।

## अभ्यासः ( मौखिकः )

1. **अधोलिखितानां प्रश्नानाम् उत्तरं वदत–**

(क) प्रकृतेः नियमः कः?

(ख) जीवने सदा किं न तिष्ठति?

(ग) अन्तराले इति पदस्य कः अर्थः?

(घ) मानसे स्वच्छन्दता कदा पदं धारयति?

(ङ) कः कालः श्रेष्ठः भवति?

2. **अधोलिखितानां मौखिकम् उत्तरम् दत्त–**

(क) कदा का किशोरावस्था कथ्यते?

(ख) अनुशासनम् कदा अप्रियं भवति?

(ग) साधनाभावे किं न उचितम्?

(घ) नीतिपद्यांशस्य कः अर्थः अनुसरणीयः?

(ङ) प्रारब्धं के न परित्यजन्ति?

(च) शिक्षाकाले किं चिन्तयेत्?

3. **उदाहरणमनुसृत्य उत्तरं वदत–**

**उदाहरणम्– परि + वृत् + ल्युट् = परिवर्तनम्**

(क) .................. परिमार्जनम्

(ख) .................. परिशोधनम्

(ग) .................. अनुशीलनम्

(घ) .................. अनुसरणम्

(ङ) .................. पालनम्

**4. उदाहरणमनुसृत्य पञ्च पदानि वदत–**

उदाहरणम्– कृ + अनीयर् = करणीयम्

(क) पठ ........................

(ख) श्रु ........................

(ग) स्मृ ........................

(घ) पच् ........................

(ङ) दृश् ........................

**5. उदाहरणमनुसृत्य अधोलिखितेषु पदेषु प्रकृतिं प्रत्ययं च वदत–**

**उदाहरणम् – कुमार + अण् = कौमारम्**

(क) यौवनम् ....................

(ख) मार्दवम् ....................

(ग) शैशवम् ....................

(घ) पौरुषम् ....................

(ङ) गौरवम् ....................

## अभ्यासः ( लिखितः )

**1. अधोलिखितानाम् एकपदेन उत्तरं लिखत–**

(क) जीवने प्रकृतेः नियमः कः?

(ख) स्वच्छन्दता कुत्र पदं धारयति?

(ग) किशोरेषु कस्य परिशोधनम् आवश्यकम् भवति?

(घ) दूरतः अपि दृश्यमानं लक्ष्यं कैः लभ्यते?

(ङ) श्रेष्ठः कालः कः अस्ति?

**2. निम्नलिखितानां पूर्णवाक्येन उत्तरं लिखत–**

(क) कृष्णः गीतायां केन रूपेण अवस्थात्रयं निर्दिशति?

(ख) उच्चविद्यालये अधीयानाः के भवन्ति?

(ग) शिक्षकाः अभिभावकाश्च कस्मिन् विषये दत्तावधानाः न भवन्ति?

(घ) के स्वमित्राणि विकृतानि कुर्वन्ति?

(ङ) कथं स्वाभिलाषस्य पूरणं श्रेयः?

(च) लक्ष्यं प्राप्तुं किं कर्तव्यम्?

(छ) किशोरजीवनस्य मन्त्रद्वयं किम्?

**3. 'क' स्तम्भे दत्तानां पदानां समानार्थकं पदं 'ख' स्तम्भे दत्तम्/ तौ यथोचितम् योजयत**

| 'क' | 'ख' |
|---|---|
| कौमारम् | स्वैरवृत्तिः |
| यौवनम् | मध्ये |
| तदानीम् | सम्प्रति |
| स्वच्छन्दता | किशोरावस्था |
| अधुना | तदा |
| अन्तराले | युवावस्था |

**4. रेखांकित-सर्वनाम-पदानि केभ्यः प्रयुक्तानि सन्ति लिखत–**

(क) बालावस्था–युवावस्थयोरन्तराले च सा भवति।

(ख) विद्यालये सामान्या शिक्षाक्रमेण ते परम्परागतं पाठमेवानुसरन्ति।

(ग) तेषां महत्त्वाकाङ्क्षां वर्धयन्ति।

(घ) एते च स्वपरिवारं प्रति आक्रोशभावं प्रकटयन्ति।

(ङ) तेषां शरीरिको मनोवैज्ञानिकश्च पक्षावुपेक्षितौ स्तः।

## 5. अधोलिखितं रेखांकित– पदमनुसृत्य प्रश्ननिर्माणं कुरुत–

(क) कृष्ण: गीतायां निर्दिशति।

(ख) तत्र कौमारम् एव किशोरावस्था कथ्यते।

(ग) सम्प्रति एकमपि कार्यं ताभि: अलभ्यं न दृश्यते।

(घ) शिक्षाकाले वर्तमानकार्यमेव चिन्तयेत्।

(ङ) किशोरै: स्वकीयं मूलं साधनजातं न विस्मरणीयम्।

## 6. अधोलिखितानाम् अव्ययपदानां सहायतया रिक्तस्थानानि पूरयत–

**सदा, च, एव, शनैः शनैः, यदा कदा, अधुना, कुत्र**

(क) बाललक्षणं ............... परुषतां प्राप्नोति।

(ख) किशोर्योऽपि स्वाभिलाषं पूरयितुं ............... क्षमा: सन्ति।

(ग) शिक्षकाभिभावकयोर्मध्ये ............... संवाद: अनिवार्य:।

(घ) एकरूपता जीवने ............... न तिष्ठति।

(ङ) किशोराणा सा ............... कथा वर्तते।

## 7. संधिः संधिविच्छेदं वा कुरुत–

(क) प्रकृते: + नियम: .....................

(ख) सैव .....................

(ग) तावत् + मार्दवम् .....................

(घ) किशोरैर्भवित्व्यम् .....................

(ङ) पक्षौ + उपेक्षितौ .....................

(च) सोद्देश्यताम् .....................

(छ) कृष्णो गीतायाम् .....................

(ज) जीवने + अवस्थात्रयम् ....................

(झ) किशोर्यः + अपि ....................

(ञ) किशोर्यश्च ....................

Ø. उदाहरणमनुसृत्य समस्तपदानि लिखत–

| उदाहरणम्– | पदानि | समस्तपदानि | समासनाम |
|---|---|---|---|
| | **एका चासौ रूपता** | **एकरूपता** | **कर्मधारयः** |
| (क) | किशोराणाम् अवस्था | ........................ | षष्ठी तत्पुरुषः |
| (ख) | परम्परया आगतम् | ........................ | तृतीया तत्पुरुषः |
| (ग) | दत्तम् अवधानम् यैः | ........................ | बहुव्रीहिः |
| (घ) | शासनस्य पश्चात् | ........................ | अव्ययीभावः |
| (ङ) | प्रगतम् आरब्धम् | ........................ | प्रादिः |
| (च) | न प्रियम् | ........................ | नञ् |

9. उदाहरणमनुसृत्य कृदन्तपदेषु धातुं प्रत्ययं च पृथक् कृत्वा लिखत–

| उदाहरणम्– | **पदानि** | **धातवः** | **प्रत्ययः** |
|---|---|---|---|
| | **आगतम्** | **आ + ⊠गम्** | **क्त** |
| (क) | उपेक्षितः | ................ | ................ |
| (ख) | अनिवार्यः | ................ | ................ |
| (ग) | कर्तव्यम् | ................ | ................ |
| (घ) | पूरयितुम् | ................ | ................ |
| (ङ) | दृश्यमानम् | ................ | ................ |
| (च) | जातम् | ................ | ................ |

(छ) अवधेयः ................ ................

(ञ) काम्यम् ................ ................

10. **अधोलिखितश्लोकांशस्य भावार्थं लिखत–**

दैवं निहत्य कुरु पौरुषमात्मशक्त्या

यत्ने कृते यदि न सिध्यति कोऽत्र दोषः ।

## योग्यता-विस्तारः

1. **भाषिकः–**

(क) 'योग्य' या 'चाहिए' अर्थ में धातुओं से तव्यत् और तव्य प्रत्यय का प्रयोग होता है। दोनों में शेष 'तव्य' बचता है। इसी अर्थ में 'अनीयर्' प्रत्यय का भी प्रयोग होता है। 'इसमें' र् का लोप् हो जाता है और 'अनीय' शेष रहता है। यथा–

तव्य/ तव्यत् अनीयर

कृ + तव्यत् = कर्तव्यम् - करने योग्य – करणीयम्

भू + तव्यत् = भवितव्यम् - होने योग्य – भवनीयम्

दृश् + तव्यत् = द्रष्टव्यम् - देखने योग्य – दर्शनीयम्

पच् + तव्यत् = क्तव्यम् - पकाने योग्य – पचनीयम्

पठ् + तव्यत् = पठितव्यम् - पढ़ने योग्य – पठनीयम्

(ख) चाहिए और योग्य अर्थ में ही ऋकारान्त और व्यञ्जनान्त धातु से 'ण्यत्' प्रत्यय होता है। इसमें 'ण्' और 'त्' का लोप हो जाता है तथा 'य' शेष बचता है। यथा–

कृ + ण्यत् = कार्यम् - करने योग्य

पठ् + ण्यत् = पाठ्यम् - पढ़ने योग्य

हृ + ण्यत् = हार्यम् - हरने योग्य, ले जाने योग्य

पच् + ण्यत् = पाच्यम् – पचाने योग्य

त्यज् + ण्यत् = त्याज्यम् – त्यागने योग्य

(ग) इसी अर्थ में स्वरान्त धातु से 'यत्' प्रत्यय होता है। इसमें 'त्' का लोप हो जाता है तथा 'य' शेष बचता है। यथा–

पा + यत् = पेयम् – पीने योग्य –

दा + यत् = देयम् – देने योग्य –

भू + यत् = भव्यम् – होने योग्य –

गै + यत् = गेयम् – गाने योग्य –

चि + यत् = चेयम् – चुनने योग्य –

(घ) 'के लिए' के अर्थ में धातु से 'तुमुन्' प्रत्यय का प्रयोग होता है। इसमें उन् का लोप हो जाता है तथा धातु से 'तुम्' लग जाता है। यथा–

⌧पा + तुमुन् = पातुम् – पीने के लिए

⌧पठ् + तुमुन् = पठितुम् – पढ़ने के लिए

⌧गम् + तुमुन् = गन्तुम् – जाने के लिए

⌧पृ + णिच् + तुमुन् = पूरयितुम् – पूरा करने के लिए

⌧हन् + तुमुन् = हन्तुम् – मारने के लिए

2. **ज्ञातव्यनीतिः**

□ **मनुष्याणां शरीरस्थः बन्धुः रिपुश्च**

"आलस्यं हि मनुष्याणां शरीरस्थो महारिपुः।
नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति।।"

□ **किशोरैः भास्करेणेव प्रतापः संचेतव्यः**

"एकेनापि हि शूरेण पादाक्रान्तं महीतलम्।
क्रियते भास्करेणेव स्फारस्फुरिततेजसा।।"

□ **सदा महापुरुषाः आचरणीयाः**

"परिचरितव्याः सन्तो यद्यपि कथयन्ति नो सदुपदेशम्।
यास्त्वेषां स्वैरकथास्ता एव भवन्ति शास्त्राणि।।"

□ **कार्यं विचार्य एव कर्तव्यम् सदा।**

© BSTBPC

"कर्मायत्तं फलं पुंसां बुद्धिः कर्मानुसारिणी।
तथापि सुधिया भाव्यं सुविचार्यैव कुर्वता।।"

3. **गीता–** कुरुक्षेत्र की रणभूमि में कृष्ण ने अर्जुन को गीता का उपदेश दिया था। वे उपदेश ही गीता (श्रीमद्भगवद्गीता) के नाम से प्रसिद्ध ज्ञाननिधि है। इसमें 18 अध्याय है। इस महनीय ग्रन्थ का अनुवाद विश्व की प्रायः सभी प्रमुख भाषाओं में हो चुका है। इसके ज्ञान से सारी दुनिया लाभान्वित हो रही है।